"पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यङ्घिपर्ण्यपि ।
क्रोष्टुविन्ना सिंहपुच्छी कलशीद्धावनिर्गुहा" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

क्रोष्टेक्षुः, पुं, (क्रोष्टोः प्रियः इक्षुः । पृषोदरात् उकारस्य ग्रले सन्धिः ।) श्वेतेक्षुः । इति राजनिर्घण्टः ॥

क्रोष्ट्री, स्त्री, (क्रोष्टु + "तृज्वत् क्रोष्टुः" । इति ऋदन्तात् स्त्रियां ङीप् ।) शुक्लभूमिकुष्माण्डः । इत्यमरः । २ । ४ । ११० ॥
('विदारी स्वादुगन्धा च सा तु क्रोष्ट्री सिता स्मृता'॥ इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) शृगालिका । कृष्णविदारी । लाङ्गली । इति मेदिनी ॥

क्रौञ्चः, पुं, (क्रुञ्च + प्रज्ञाद्यण् स्वार्थे ।) पक्षिभेदः । कोँच वक इति भाषा । (यथा, रामायणे । १ । २ । १५ ।
"मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्" ॥)
तत्पर्य्यायः । क्रुङ् २ क्रुञ्चः ३ क्रुञ्चा ४ क्रौञ्चा ५ । इत्यमरभरतौ ॥ कालिकः ६ कालीकः ७ कलिकः ८ । इति शब्दरत्नावली ॥ (अस्य गुणा यथा,—
"क्रौञ्चो वृष्योऽतिरुचिकृदश्मरीं हन्ति नित्यशः ।
शोषमूर्च्छाहरो दीप्यो हन्ति कासमरोचकम्" ॥
इति हारीते प्रथमस्थाने ११ अध्याये ॥)
पर्व्वतविशेषः । इति मेदिनी ॥ (अयन्तु हिमवतः पौत्रः मैनाकस्य पुत्रः ।
यथा, हरिवंशे १८ । १३-१४ ।
"एतेषां मानसी कन्या मेना नाम महागिरेः ।
पत्नी हिमवतः श्रेष्ठा यस्या मैनाक उच्यते ॥
मैनाकस्य सुतः श्रीमान् क्रौञ्चो नाम महागिरिः ।
पर्व्वतप्रवरः शुभ्रो नानारत्नसमन्वितः" ॥)
कुररपक्षी । इति राजनिर्घण्टः ॥ द्वीपभेदः । स च दधिमण्डोदसमुद्रेणावृतः षोड़शलक्षयोजनपरिमितः । (यथा, विष्णुपुराणे । २ । ४ । ५७-५८ ।
"क्रौञ्चद्वीपः समुद्रेण दधिमण्डोदकेन च ।
आवृतः सर्व्वतः क्रौञ्चद्वीपतुल्येन मानतः ॥
दधिमण्डोदकश्चापि शाकद्वीपेन संवृतः ।
क्रौञ्चद्वीपस्य विस्ताराद् द्विगुणेन महामुने !" ॥
तस्याधिपतिः प्रियव्रतराजपुत्रो घृतपृष्ठः ।
यथा, भागवते । ५ । २० । १८-२० ।
"तथा च वहिः क्रौञ्चद्वीपो द्विगुणः स्वमानेन क्षीरोदेन परीत उपक्लृप्तो वृतो यथा, कुशद्वीपो घृतोदेन । यस्मिन् क्रौञ्चो नाम पर्व्वतराजो द्वीपनामनिर्व्वर्त्तक आस्ते ॥ योऽसौ गुहप्रहरणोन्मथितनितम्बकुञ्जोऽपि क्षीरोदेनासिच्यमानो भगवता वरुणेनाभिगुप्तो विभयो बभूव ॥ तस्मिन्नपि प्रैयव्रतो घृतपृष्ठो नामाधिपतिः स्वे द्वीपे वर्षाणि सप्त विभज्य तेषु पुत्रनामसु सप्त रिक्थादान् वर्षपान् निवेश्य स्वयं भगवान् भगवतः परमकल्याणयशस आत्मभूतस्य हरेश्चरणारविन्दमुपजगाम" । दैत्यविशेषः । स च मयदानवपुत्रः ।
यथा, हरिवंशे । ३६ । २१—२४ ।
"तान्पाशहस्तग्रथितांश्छादितान् शीतरश्मिना ।
मयो ददर्श मायां वै दानवानां महात्मनाम् ।
स शिलाजालविततां गण्डशैलाट्टहासिनीम् ।
पादपोत्कटकूटाग्रां कन्दराकीर्णकाननाम् ॥
सिंहव्याघ्रगजाकीर्णां नदन्तीमिव यूथपैः ।
ईहामृगगणाकीर्णां पवनाघूर्णितद्रुमाम् ॥
निर्म्मितां स्वेन पुत्त्रेण क्रौञ्चेन दिविकामगाम्
प्रहृतां पार्व्वतीं मायां सहृजे दानवोत्तमः" ॥
अयमेवासुरः क्रौञ्चद्वीपे क्रौञ्चपर्व्वते हेमकन्दरे भगवता स्कान्देन निहतः । यथा,—मृगेन्द्रसंहितायाम् ।
"क्रौञ्चे क्रौञ्चो हतो दैत्यः क्रौञ्चाद्रौ हेमकन्दरे ।
स्कन्देन युद्धा सुचिरं चित्रमायी सुमायिना ।
स शैलस्तस्य दैत्यस्य ख्यातस्तेनैव कर्म्मणा ।
केतुतामगमत्तस्य नाम्ना क्रौञ्चः स उच्यते" ॥)
अर्हतां ध्वजः । राक्षसविशेषः । इति हेमचन्द्रः ॥

क्रौञ्चदारणः, पुं, (क्रौञ्चं स्वनामख्यातपर्व्वतविशेषं दारयतीति । दृ + णिच् + ल्युः । क्रौञ्चस्य दारण इति केचित् ।) कार्त्तिकेयः । इत्यमरः ।१।१।४३ ॥ अस्य क्रौञ्चदारणकथा महाभारते ३ । मार्कण्डेयसमस्यापर्व्वणि २२४ । ३१-३६ ।
"स तूत्थाय महाबाहुरुपसान्त्व्य च तान् जनान् ।
धनुर्विकृष्य व्यसृजद्बाणान् श्वेते महागिरौ ॥
बिभेद स शरैः शैलं क्रौञ्चं हिमवतः सुतम् ।
तेन हंसाश्च गृध्राश्च मेरुं गच्छन्ति पर्व्वतम् ॥
स विशीर्णोऽपतच्छैलो भृशमार्त्तस्वरान् रुवन् ।
तस्मिन्निपतिते त्वन्ये नेदुः शैला भृशं तदा ॥
स तं नादं भृशार्त्तानां श्रुत्वापि बलिनाम्बरः ।
न प्राव्यथदमेयात्मा शक्तिमुद्यम्य चानदत् ॥
सा तदा विमला शक्तिः क्षिप्ता तेन महात्मना ।
बिभेद शिखरं घोरं श्वेतस्य तरसा गिरेः ॥
स तेनाभिहतो दीर्णो गिरिः श्वेतोऽचलैः सह ।
उत्पपात महीं त्यक्त्वा भीतः स सुमहात्मनः" ॥
क्रौञ्चं असुरविशेषं दारयति नाशयतीति च । क्रौञ्चासुरवधकथा क्रौञ्चशब्दे द्रष्टव्या ॥)

क्रौञ्चा, स्त्री, (क्रौञ्च + टाप् ।) क्रौञ्चभार्य्या । कोँचवकी इति भाषा । इति जटाधरः ॥ (केचित्तु टावन्तं न मन्यन्ते ङीवन्तमेवेच्छन्ति । तथा च रामायणे १ । २ । १४ ।
"निशाम्य रुदतीं क्रौञ्चीमिदं वचनमब्रवीत्" ॥)

क्रौञ्चादनं, क्ली, (अद्यते इति । अद् + कर्म्मणि ल्युट् । क्रौञ्चस्य अदनं भक्ष्यम् ।) मृणालम् । घेञ्चुली । घेँचु इति भाषा । चिञ्चोटकः । इति मेदिनी ॥ चेँचको इति भाषा । शेषस्य गुणाः । गुरुत्वम् । अजीर्णकारित्वम् । शीतत्वञ्च । इति राजवल्लभः ॥ ("क्रौञ्चादनं घेञ्चुलिका" । इति वैद्यकरत्नमालायाम् ।) पिप्पली । इति शब्दरत्नावली ॥

क्रौञ्चादनी, स्त्री, (क्रौञ्चादन + ङीप् ।) पद्मबीजम् । इति राजनिर्घण्टः ॥

क्रौञ्चारातिः, पुं, (क्रौञ्चस्य स्वनामख्यातस्य पर्व्वतस्य दैत्यस्य वा अरातिः शत्रुः ।) कार्त्तिकेयः । इति हलायुधः ॥

क्रौञ्चारिः, पुं, (क्रौञ्चस्य अरिः ।) कार्त्तिकेयः ! इति हेमचन्द्रः ॥ परशुरामः । इति शब्दमाला ॥

क्रोशशतिकः, पुं, (क्रोशशतं गच्छति । "क्रोशशतयोजनशतयोरुपसंख्यानम्" । वार्त्ति ५ । १ । ७४ । इति ठञ् ।) शतक्रोशगमनकर्त्ता । इति व्याकरणम् ॥ (क्रोशशतादभिगमनमर्हतीति । "ततोऽभिगमनमर्हति" । इति ठञ् क्रोशशतादागन्ता भिक्षुः ॥)

क्रथ कि म वधे । इति कविकल्पद्रुमः ॥ (चुरां पक्षे भ्वां-परं-सकं-सेट् ।) अन्तःस्थतृतीययुक्तः । कि, क्लथयति क्लथति । म, क्लथयति । इति दुर्गादासः ॥

क्लद, इ ञ ङ रुदि । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-आत्मं च-अकं-सेट् ।) अन्तःस्थ तृतीययुक्तः । इ, कर्म्मणि क्लन्द्यते । ञ, क्लन्दति क्लन्दते । ङ, क्लन्दते । रुदि रोदने । इति दुर्गादासः ॥

क्लद, इ ष म ङ रोदने । आह्वाने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-आह्वाने सकं-सेट् ।) इ, कर्म्मणि क्लन्द्यते । ष, क्लन्दा । म, क्लन्दयति । ङ, क्लन्दते । इति दुर्गादासः ॥

क्लद, ष म ङ वैक्लव्यविकलत्वयोः । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) वैक्लव्यं विक्लवीभावः । ष, क्लदा । म, क्लदयति । ङ, क्लदते शोकार्त्तः । इति दुर्गादासः ॥

क्लम, उ भ इर् ग्लानौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् । उदित्वात् क्त्वावेट् ।) अन्तःस्थतृतीययुक्तः । उ, क्लमित्वा क्लान्त्वा । म, क्लाम्यति । भ्वादिपक्षेऽपि शमादित्वं "ष्ठिवुक्लमाचम" इति दीर्घज्ञापनार्थम् । इर्, अक्लमत् अक्लमीत् । इति दुर्गादासः ॥

क्लम, ञि य भ ग्लानौ । इति कविकल्पद्रुमः ॥ (दिवां-परं-अकं-सेट् ।) अन्तःस्थतृतीययुक्तः । ञि, क्लान्तोऽस्ति । य भ, क्लाम्यति । इति दुर्गादासः ॥

क्लमः, पुं, (क्लम + भावे घञ् । "नोदात्तोपदेशस्येति" । ७ । ३ । ३४ । इति न वृद्धिः ।) आयासः । इत्यमरः । ३ । २ । १० ॥ (यथा, मनौ । ७ । २२५ ।
"तत्र भुक्त्वा पुनः किञ्चित् तूर्य्यघोषैः प्रहर्षितः ।
संविशेत्तु यथाकालमुत्तिष्ठेच्च गतक्लमः ॥ अस्य लक्षणं यथा,—
"योऽनायासः श्रमो देहे प्रवृद्धः श्वासवर्ज्जितः ।
क्लमः स इति विज्ञेय इन्द्रियार्थप्रबाधकः" ॥
इति सुश्रुतेन शारीरस्थाने चतुर्थाध्याये उक्तम् ॥)

क्लमथः, पुं, (क्लम् + "शमादिभ्योऽथच् इति" अथच् ।) आयासः । इत्यमरः । ३ । २ । १० ॥

क्लव, ष म ङ भये । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) ष, क्लवा । म, क्लवयति । ङ, क्लवते । विक्लवन्ति दिवि ग्रहाः । इति पचादित्वादनि विक्लवा इवाचरन्तीति क्वौ साध्यम् । इति दुर्गादासः ॥

क्लान्तः, त्रि, (क्लम + कर्त्तरि क्तः ।) क्लान्तियुक्तः । श्रान्तः । यथाह, जयदेवः ।
"मदनकदनक्लान्तः कान्ते ! प्रियस्तव वर्त्तते" ॥
(महाभारते च । ३ । ७३ । २७ ।
"विश्राम्यतामित्युवाच क्लान्तोऽसीति पुनःपुनः" ॥)

क्लिद, इ ञ ङ रुदि । इति कविकल्पद्रुमः ॥ (भ्वां उभं-आत्मं च-अकं-सेट् ।) अन्तःस्थतृतीययुक्तः ।